# ब्लू प्रिंट विषय– संस्कृत

| खण्ड : विषयः | | प्रश्न प्रकाराः प्रश्न–संख्या | | मूल्यभारः |
|---|---|---|---|---|
| | 'क' | अपठित–अवबोधनम् – 10 अंकः | | |
| (1) | पठनावबोधनम्<br>एकः अनुच्छेदः | लघूत्तरात्मकाः<br>बहुविकल्पात्मकः | | 10 |
| | 'ख' | रचनात्मकं कार्यम्–15 अंकाः | | |
| (2) | अनौपचारिकपत्रम् | निबन्धात्मकः | 1 | 5 |
| (3) | चित्रवर्णनम्<br>अनुच्छेद लेखनं वा | निबन्धात्मकः | 1 | 10 |
| | 'ग' | अनुप्रयुक्तव्याकरणम्–25 अंक : | | |
| (4) | संधि कार्यम् | लघूत्तरात्मकः | 1 | 4 |
| (5) | समासः | बहुविकल्पात्मकः | 1 | 4 |
| (6) | प्रत्ययाः | बहुविकल्पात्मकः | 1 | 4 |
| (7) | वाच्यपरिवर्तनम् | बहुविकल्पात्मकः | 1 | 3 |
| (8) | समयावबोधनम् | अतिलघूत्तरात्मकाः | 1 | 2 |
| (9) | अव्यय प्रयोगाः | बहुविकल्पात्मकः | 1 | 4 |
| (10) | वाक्य–संशोधनम् | लघूत्तरात्मकाः | 1 | 4 |
| | 'घ' | पठित अवबोधनम् – 30 अंकाः<br>शेमुषी भाग – 2 | | |
| (11) | गद्यांशः, श्लोकः<br>नाट्यांशः<br>(अ) (आ) (इ) | अतिलघूत्तरात्मकाः | 1:1:1 | 6:6:6 |
| (12) | प्रश्न–निर्माणम् | लघूत्तरात्मकाः | 1 | 4 |
| (13) | अन्वयकार्यम् | अतिलघूत्तरात्मकाः | 1 | 4 |
| (14) | भावावबोधनम् | अतिलघूत्तरात्मकाः<br>बहुविकल्पात्मकः | 1 | 4 |
| | | | | 80 |

**SET- I**

समय – होरात्रयम्

**प्रश्न पत्र प्रारूप**

**संस्कृत**

पूर्णांक : ४०

**दशमी कक्षा**

**सामान्य निर्देशाः**

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति। (इस प्रश्नपत्र में चार खण्ड हैं।)

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि। (प्रत्येक खण्ड का उत्तर एक ही स्थान में क्रम से लिखना है)

(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एवं लेखनीयानि। (सभी प्रश्नों का उत्तर संस्कृत में ही लिखना है।)

**खण्ड – 'क' (अपठित अवबोधनम्)** 10

1 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत (निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों का उत्तर संस्कृत में लिखें।) 1

एकदा एकः कर्तव्यपरायणः नगररक्षकः इतस्ततः भ्रमन् एकम् अशीतिवर्षीयं महापुरूषं दृष्टवान्। सः आम्रवृक्षस्य आरोपणे तल्लीनः आसीन्। इदं दृष्टवा नगररक्षकः तं महापुरूषम् अवदत् अवलोकनेन प्रतीयते यत् यदा एषः वृक्षः फलिष्यति तदा भवान् जीवितः न भविष्यति। अतः किमर्थं वृथा परिश्रमं कुर्वन्ति भवन्तः? महापुरूषः हसित्वा अवदत्–पश्यन्तु एतान् फलयुक्तान् वृक्षान्। एतेषाम् आरोपणं मया न कृतम् परं फलानि अहं खादित्वा सन्तुष्टः भवामि। अतः यदा मम आरोपितस्य वृक्षस्य फलानि अन्ये खादिष्यन्ति, अहं पुनः प्रसन्नः भविष्यामि। महापुरूषस्य वचनं श्रुत्वा तं सः नमस्कृत्य नगररक्षकः उक्तवान् अनुकरणीया एव सज्जनानां सज्जनता।

I एकपदेन उत्तरत – (एक पद में उत्तर दें) 1x2=2

(i) नगररक्षकः कीदृशं महापुरूषं दृष्टवान्?

(ii) महापुरूषः कस्य वृक्षस्य आरोपणे तल्लीनः आसीत्?

II पूर्णवाक्येन उत्तरत – (पूर्ण वाक्य में उत्तर दें।) 2x2=4

(i) नगररक्षकः अशीतिवर्षीयं महापुरूषः कुत्र अपश्यत्?

(ii) महापुरूषस्य वचनं श्रुत्वा नगररक्षकः किम् उक्तवान्?

III निम्नलिखितप्रश्नानां समुचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत– (निम्नलिखित प्रश्नों का उत्तर दिए गए विकल्पों में से चुनकर लिखें।) 1/2x4=2

(i) 'नगररक्षकः इति पदस्य विशेषणपदं किम्?

(क) महापुरूषः (ख) कर्तव्यपरायणः

(ग) कर्तव्यः (घ) परायणः

(ii) अस्मिन् गद्यांशे 'व्यर्थम्' इत्यर्थे कः पर्यायः प्रयुक्तः ?

(क) वृथा (ख) एकम्

(ग) परिश्रमम् (घ) कृतम्

(iii) अस्मिन् गद्यांशे 'भविष्यामि' इति क्रियापदस्य कर्तृपदं लिखत।

(क) पुनः (ख) अहम्
(ग) प्रसन्नः (घ) अन्ये

(iv) 'खादित्वा' इति पदे कः प्रत्ययः अस्ति ?
(क) क्तवतु (ख) क्तिन्
(ग) क्त्वा (घ) क्त

IV अस्य गद्यांशस्य कृते एक समुचितं शीर्षकं लिखत– (इस गद्यांश के लिए एक उपयुक्त शीर्षक लिखें) 2

**खण्ड : 'ख' (रचनात्मकं कार्यम्)**

3 पत्र लेखनम् –

अखिलेशः दिल्ली नगरे वसति। तस्य मित्रं दिवाकरः असमप्रदेशे निवसति। अखिलेशेन गणतंत्रदिवसस्य शोभायात्रायां भागः गृहीतः। सः स्व अनुभवान् स्वमित्रं दिवाकरं प्रति पत्रं लिखति। मञ्जूषातः पदानि विचित्य रिक्तस्थानानि पूरयत– (अखिलेश दिल्ली में रहता है। उसका मित्र दिवाकर असम प्रदेश में रहता है। अखिलेश के द्वारा गणतंत्र दिवस के शोभा यात्रा में भाग लिया है। वह अपने अनुभवों को अपने मित्र दिवाकर को पत्र लिखता है। मञ्जूषा से पद चुनकर रिक्त स्थानों को भरें।)

प्रिय मित्र दिवाकर ............... (I) ............ 1/2x=10=5

........................ (II) ..........................! नवदिल्लीतः

अत्र कुशलं तत्रास्तु। अहं .............(III).................. सत्रजायां व्यस्तः आसम्। अतः विलम्बेन तव पत्रस्य उत्तरं ददामि। अस्मिन् वर्षे मया अपि गणतंत्रदिवसस्य शोभायात्रायां भागः ..... (IV)..... अस्माकं विद्यालयस्य वाद्यवृन्दम् राजपथे स्वकलायाः प्रदर्शनम् अकरोत्। अहं गरबानृत्यस्य .........(V)............ आसम्। छात्राणां राष्ट्रगानस्य ओजस्वी ध्वनिः .......(VI).............. गुञ्जितम् अकरोत्। स्वराष्ट्रस्य सैन्यबलानां पराक्रमप्रदर्शनानि विचित्रवर्णानि परिदृश्यानि लोकनृत्यानि च दृष्ट्वा अहं गौरवान्वितः अस्मि। .......... (VII)........बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जाता। .........(VIII)............ वन्दनीयौ।

भवतः....(IX).....
अखिलेशः

सेवायाम्
दिवाकरः
14, अवतारमार्गः
......(X)........

मञ्जूषा – (गृहीतः, पितरौ, नमस्ते, मम, सुहृद्, राजपथम्, वसन्तविहारः, संचालकः, असमप्रदेशः, गणतंत्रदिवससमारोहस्य)

3 अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषापदसहायतया पञ्चवाक्यानि संस्कृतेन लिखत– नीचे दिए चित्र को देखकर मञ्जूषा के पदों की सहायता से संस्कृत में पाँच वाक्य लिखें।) 2x5=10



**मञ्जूषा**

(उद्यानम्, बाल, वृक्ष पादप, जन, प्रातः, पक्षी पुष्पम्, क्रीडा, सुन्दरवेला, कन्दुकम्)

**अथवा**

मञ्जूषाप्रदत्तशब्दानां सहायतया 'रक्षाबंधनम्' विषयम् अधिकृत्य पञ्चसंस्कृतवाक्येषु एकम् अनुच्छेदं लिखत– (मञ्जूषा में दिए गए शब्दों की सहायता से 'रक्षाबंधन' विषय पर पाँच संस्कृत के वाक्यों में एक अनुच्छेद लिखें।)

मञ्जूषा – (भ्रातुः, भगिनी, राखीबन्धनम्, आशीवार्दम्, करोति, उपहारम्, धनम्, प्रमुदितमनः, भारतवर्षे, तिलकं)

**खण्ड : 'ग' (अनुप्रयुक्तव्याकरणम्)** 25

4 अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत– (निम्नलिखित वाक्यों में रेखांकित पदों का सन्धि या सन्धि–विच्छेद कर लिखें।)

(i) सहसा+एव एकः सिंहः तत्रागच्छत्। 1x4=4

(ii) भारतीय संस्कृतिः प्राचीनतमा अस्ति।

(iii) पुरः +हितः सर्वेषां जनानां हितमिच्छन्ति।

(iv) तस्य भाग्योदयः अल्पवयसि एव अभवत्।

5 अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत– (निम्नलिखित वाक्यों में रेखांकित पदों का समास या विग्रह दिए गए विकल्पों में से चुनकर लिखें)

(I) मातापितरौ पूज्यो स्तः।

(क) माता च पिता च (ख) मातृ च पितृ च

(ग) माता च पितृ च (घ) पितृ च माता च

(II) नीलकण्ठः कैलाशशिखरे तपते

(क) नीलः कण्ठः (ख) नीलं कण्ठं यस्य स

(ग) नीलं कण्ठम् (घ) नीलं कण्ठं सः

(III) सा विधिम् अनतिक्रम्य गणितं शिक्षयति।

(क) यथावधिः (ख) यथाविधिम्

(ग) यथा विधिः (घ) यथाविधौ

(IV) पञ्चानां तंत्राणां समाहारः नूनमेव अध्येतव्यम्।

(क) पञ्चतन्त्रः (ख) पञ्चातन्त्री

(ग) पञ्चातन्त्रम् (घ) पञ्चतन्त्रम्

6 अधोलिखितेषु वाक्योषु रेखाङ्कितपदानां प्रकृति–प्रत्ययौ संयोज्य वियोज्य वा उचितं उत्तरं विकल्पेभ्यः चित्वा लिखत– (निम्नलिखित वाक्यों में रेखांकित पदों का प्रकृति–प्रत्यय जोड़कर या पृथक् कर उचित उत्तर विकल्पों में से चुनकर लिखें।)

(I) सवेगं <u>वहन्ती</u> गंगा खलु शोभमाना। 1x4=4

(क) शुभ्+शतृ (ख) शुभ+शानच्

(ग) शुभ्+तुमुन् (घ) शुभ्+क्त

(II) <u>गायिका</u> प्रकृतिगीतं गायति।

(क) गायक+टापू (ख) गायक+डाप्

(ग) गायक+चाप् (घ) गायक+ङीप्

(III) मार्गे <u>गम्+शतृ</u> कलहं मा कुरु।

(क) गम्यमानः (ख) गतवान्

(ग) गच्छन् (घ) गत्वा

(IV) सर्वे सुख+इन् सन्तु।

(क) सुखी (ख) सौरण्यम्

(ग) सुखिनः (घ) सौभाग्यशालिनः

7 अधोलिखितं संवादं मञ्जूषायां दत्तैः पदैः वाच्य–परिवर्तनं कृत्वा पूरयित्वा च पुनः लिखत– (निम्नलिखित संवाद को मञ्जूषा में दिए गए पदों से वाच्य–परिवर्तन कर पूरा करके पुनः लिखें।) 1x3=3

राधिका – सुधे! त्वं केन यानेन विद्यालयं गच्छसि?

सुधा – राधिके ! .... (i)..... विद्यालयबसयानेन विद्यालयं गम्यते।

राधिका – सुधे ! कतिवादने विद्यालयात् गृहं प्रत्यागच्छसि?

सुधा – मया एकवादने .... (II)....... प्रत्यागम्यते।

राधिका – किं सायं क्रीडायै उपवनम् अपि गच्छसि?

सुधा – आम्, मायां सायं नित्यं क्रीडायै उपवनम् अपि ................. (III)......।

मंजूषा – (गम्यते, मया, गृहम्)

8 अधोलिखितायां दिनचर्यायां रिक्त स्थानानि कालबोधक शब्दैः पूर्यन्ताम् (निम्नलिखित दिनचर्चा में रिक्त स्थानों को समय बोधक शब्दों से पूरा करें।) 1x2=2

(I) सन्ध्यायां .....(i)..... (7.00) वादने वरयात्रां प्रस्थानं करिष्यति।

(II) रात्रौ.....(ii)....... (3.30) वादने पाणिग्रहण संस्कारः भविष्यति।

9 अधोलिखितेषु वाक्येषु रिक्त स्थानानि मञ्जूषायां प्रदत्तैः उचितैः अव्यय पदैः पूरयित्वा लिखत– (निम्नलिखित वाक्यों में रिक्त स्थानों को मञ्जूषा में दिए गए शब्दों से (अव्यय पदों से) पूरा करके लिखें।) 1x4=4

(एव, उच्चैः, नूनम्, पुरा)

(i) मूर्खाः ................. जल्पन्ति।

(ii) श्वः .............. वृष्टिः भविष्यति।

(iii) .................. दशरथो नाम नृपतिरासीत्।

(iv) धनम् .............. बलं लोके।

10 अधोलिखितेषु वाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। अशुद्धम् पदम् संशोध्य लिखत– (निम्नलिखित पदों में रेखांकित पद अशुद्ध है। अशुद्ध पद को संशोधित कर लिखें।) 1x4=4

(i) त्वं मम् मित्रः असि।

(ii) भानुः पूर्वस्यां दिक्षु उदेति।

(iii) एषः मम पुस्तकम् अस्ति।

(iv) रामः सह सीता अपि वनं गतवती।

## खण्ड : 'घ' (पठित–अवबोधनम्)

11 अधोलिखितं गद्यांशं, श्लोकं, नाट्यांशं च पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत्– (निम्नलिखित गद्यांश, श्लोक और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखें।)

(अ) गद्यांशः

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रो चपेटया प्रहृत्य जगाद– "कथमेकैशो व्याघ्रभक्षणाय कलहं कुरूथ? अयम् एकः तावत् विभज्य भुज्यताम्। पश्चात् अन्यो द्वितीयः कश्चित् लक्ष्यते।"

इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलो चिन्तः नष्टः।

I एकपदेन उत्तरत– (एक पद में उत्तर दें।) 1x2=2

(i) राजपुत्रस्य किं नाम आसीत्?

(ii) व्याघ्रमारी इति मत्वा कः भयाकुलचितः नष्टः?

II पूर्ण वाक्येन उत्तरत– (पूर्ण वाक्य में उत्तर दें।) 2

सा बुद्धिमती पुत्रौ चपेटया प्रहृत्य किम् उवाच?

III प्रदत्त विकल्पेभ्यः उचितम् उत्तरं चिटवा, लिखत – (दिए गए विकल्पों में से सही उत्तर चुनकर लिखें।) 1/2x4=2

(क) 'पत्नी' इत्यर्थे गद्यांशे कः शब्दः प्रयुक्तः?

(i) भार्या (ii) कानने

(iii) व्याघ्रः (iv) मत्वा

(ख) 'वसति स्म' क्रिया पदे कः लकारः अस्ति?

(i) लट् (ii) लङ्

(iii) लृट् (iv) लोट्

(ग) 'चपेटया' इति पदे का विभक्ति प्रयुक्ता अस्ति?

(i) प्रथमा (ii) तृतीया

(iii) पंचमी (iv) सप्तमी

(घ) 'श्रुत्वा' इति पदे कः प्रत्ययः ?

(i) क्त (ii) क्तिन्

(iii) क्तवतु (iv) क्त्वा

आ श्लोकः

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः।।

I एकपदेन उत्तरत– (एक पद में उत्तर दें।) 1x2=2

(i) निर्गुणः किं न वेत्ति ?

(ii) वसन्तस्य महत्वं कः वेत्ति

II पूर्णवाक्येन उत्तरत– (पूर्ण वाक्य में उत्तर दें।) 2

करी च सिंहस्य बलं कः न वेत्ति (जानाति) ?

III प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – (दिए गए विकल्पों में से उचित उत्तर चुनकर लिखें।) 1/2x4=2

(क)'निर्गुणः' इत्यस्य पदस्य विलोमं चित्वा लिखत।

(i) वायसः (ii) गुणी

(iii) निर्बलः (iv) बली

(ख) 'कोकिला' इत्यर्थे कः पर्यायः अत्र प्रयुक्तः ?

(i) वसन्तः (ii) मूषकः

(iii) पिकः (iv) सिंहः

(ग) 'निर्बलः इति अस्मिन् पदे कः उपसर्गः ?

(i) नि (ii) निस्

(iii) निर् (iv) बलः

(घ) 'वेत्ति' इति क्रियापदे कः लकारः प्रयुक्तः अस्ति ?

(i) विधि लिङ् (ii) लोट् अनुज्ञा

(iii) लृट् (iv) लट्

3 नाट्यांशः

चाणक्यः– वत्स! मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।

शिष्यः– तथेति। (निष्क्रम्य चन्दनदासेन सह प्रविश्य) इतः श्रेष्ठिन् उभौ

शिष्यः– (उपसृत्य) उपाध्याय! अयं श्रेष्ठी चन्दनदासः!

चाणक्यः– श्रेष्ठिन्! स्वागतं ते। अपि प्रचीयन्ते संव्यवहाराणां बृद्धिलाभाः।

चन्दनदासः– (आत्मगतम्) अत्यादरः शंकनीयः। (प्रकाशम्) अथ किम्। आर्यस्य प्रसादेन अखण्डिता मे वाणिज्या।

चाणक्यः– भो श्रेष्ठिन्! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

चन्दनदासः– आज्ञापयतु आर्य, कियत् च अस्मज्जनादिष्यते इति।

चाणक्यः– भो श्रेष्ठिन्। चन्द्रगुप्तराज्यमिदं न तु नन्दराज्यम्। नन्दस्यैव

अर्थसम्बन्धः प्रीतिमुत्पादयति। चंद्रगुप्तस्तु भवतामपरिक्लेश एव।

I एकपदेन उत्तरत– (एक पद में उत्तर दें) 1x2=2

(i) कः चन्दनदासं द्रष्टुम् इच्छति?

(ii) कस्य अर्थसम्बन्धः प्रीतिमुत्पादयति?

II पूर्ण वाक्येन उत्तरत– (पूर्णवाक्य में उत्तर दें।) 2

चन्दनदासस्य वाणिज्या कथम् अखण्डिता?

III प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (दिए गए विकल्पों में उचित उत्तर चुनकर लिखें।) 1/2x4=2

(क) 'प्रविश्य' इति पदे कः मूलः धातुः?

(i) विश् (ii) विश्य

(iii) प्र (iv) ल्यप्

(ख) 'अत्यादरः इति पदस्य सन्धि–विच्छेदं कुरूत।

(i) अत्+आदरः (ii) अति+आदरः

(iii) अत्य+आदरः (iv) अत्या+आदरः

(ग) 'प्रकृतिभ्यः' इति पदे का विभक्तिः अस्ति?

(i) संबोधन (ii) द्वितीया

(iii) चतुर्थी (iv) षष्ठी

(घ) 'उपाध्याय! अयं श्रेष्ठी चन्दनदासः। अत्र विशेषण पदं किम्?

(i) उपाध्याय! (ii) श्रेष्ठी

(iii) अयम् (iv) चन्दनदासः

12 रेखाङ्कितपदमाधृत्य प्रश्न–निर्माणं कुरूत – (रेखांकित पदो ंके आधार पर प्रश्न–निर्माण करें।)

(i) त्वं <u>मानुषात्</u> विभेषि।

(ii) <u>मालाकारः</u> तोयैः तरोः पुष्टिं करोति।

(iii) राजा <u>शस्त्राहतस्य</u> सहायतां करोति।

(iv) एतादृशी भयावह घटना <u>गढ़वालक्षेत्रे</u> घटिता।

13 मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत– (मञ्जूषा से उचित पदों को चुनकर नीचे लिखे गए दोनों श्लाकों का अन्वय पूरा करें।) 1/2x8=4

(अ) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

अन्वयः– हि मनुष्याणां शरीस्थः..... (i)..... रिपुः आलस्यम् (अस्ति) ..... (ii).... बन्धुः न अस्ति यं ......(iii)...... (नरः) न ......(iv)......।

(कृत्वा, अवसीदति, उद्यमसमः, आलस्यम्)

(आ) श्रमक्लमपिपासोष्णशीतादीनां सहिष्णुता।
आरोग्यं चापि परमं व्यायामादुपजायते।।

अन्वयः– ..... (i)..... श्रमक्लमपिपासोष्णशीतादीनां .....(ii).... परमम् .... .......(iii)...... चापि ......(iv)......।

(कृत्वा, अवसीदति, उद्यमसमः, आलस्यम्)

**मञ्जूषा**

14 अधोलिखितकथनानां समुचितं भावं प्रदत्तविकल्पेभ्यः चित्वा लिखत– 1x4=4

(निम्नलिखित कथनों का भाव दिए गए विकल्पों में से चुनकर लिखें।)

(क) व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः।

(i) व्यायामात् पराक्रमः जायते।

(ii) यत्र रोगः तत्रौषधि

(iii) वैनतेयः उरगान् भक्षयति

(ख) न सा बकसहस्रेण परितस्तीरवासिना।

(i) बहुभिः मूर्खैः शोभा न भवति

(ii) एकेन गुणिना सत्वेन शोभा भवति।

(iii) वञ्चितः कलंकितः भवति

(ग) रिक्तोऽसि यज्जलद! सैव तवोत्तमा श्रीः।

(i) क्षयमायाति सञ्चयात्

(ii) भोगः स्वार्थपरकः

(iii) दानात् जीवनस्य श्रेष्ठता

(घ) राजासनं खल्वेतत् न युक्तमध्यासितुम्।

(i) शिष्टाचारः

(ii) बालसुलभचापल्यम्

(iii) प्रगल्भः नोचितः